# गायत्रीछन्दस्स्वरूपविचारः छन्दशास्त्रदिशा एकमध्ययनम्

Abhijith Sreekumar
MA Student,Dept.of Vyakarana, SSUS Kalady.

Submitted on: 16/10/2019 Revised on: 22/10/2019 Accepted on: 24/10/2019

"ब्राह्मणेन निष्कारणो हि षडङ्गो वेदो अध्येतव्यो ज्ञेयश्च"[1] इति पातञ्जले महाभाष्ये निर्दिष्टम्। ऋग्यजुस्सामाथर्वणाः वेदाः। छन्दः, कल्पः, ज्योतिषम् , निरुक्तं, शिक्षा, व्याकरणमिति षडङ्गानि वेदस्य ।[2] पाणिनीयशिक्षायाञ्च इत्थं निरूपितम्-

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ कथ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्माद् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ "[3]इति॥

वर्णाक्षरनिबन्धः मन्त्रविन्यासः छन्दशास्त्रप्रतिपाद्यः। शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमज्ञानप्रतिपादकं च कल्पशास्त्रम्। यज्ञाद्यनुष्ठानेभ्यः शुभाशुभपर्यालोचनया कालनिर्णयार्थं प्रवृत्तम् ज्यौतिषम्। वैदिकमन्त्राणां तद्गतपदपदार्थानां अवगमनाय यास्काचार्येण निरुक्तस्योपदेशः कृतः । वेदघ्राणं शिक्षा वेदोच्चारणलक्षणप्रतिपादकम्। शब्दशास्त्रं च व्याकरणं वेदस्य मुखं प्राहुः। तत्रान्यतमो वेदाङ्गः छन्दः। छन्दोबद्धाः एव सर्वे मन्त्राः। मन्त्रोच्चारणार्थं तज्ज्ञानार्थं च छन्दशास्त्रज्ञानम् अनिवार्यमेव।

**छन्दशब्दार्थः।**

'चदि' आह्लादे दीप्तौ च इत्यस्मात् धातोः सुन् प्रत्यये निष्पन्नः छन्दशब्दः। चन्दयति आह्लादयते इति छन्दः । छादयति आवृणोति मन्त्रप्रतिपाद्यार्थान् इत्यपि छन्दशब्दार्थो वक्तुमर्हः। 'यदक्षरपरिमाणं तच्छन्दः'[4] इति ऋग्वेदसर्वानुक्रमणिकायाम्। अक्षरसंघातस्य क्रमः स्वरूपो वा छन्दः इत्यर्थः । "छन्दोक्षरसंख्यावच्छेदकमुच्यते "[5] इति अथर्वबृहत्संहितायाम् छन्दोलक्षणमुच्यते। 'छन्दः पदयोभिलाषे[6] इत्यमरः ॥' छन्दांसि छादनात्'[7] इति निरुक्तकारः। "ते छन्दोभिरात्मानं छादयित्वा उपायंस्तच्छन्दसां छान्दसत्वम् " इति श्रुतिः मन्त्रणां छादकत्वात् छन्दः इति निरूपयति।[8] । भगवद्गीतायामपि वेदः इत्यर्थे छन्दशब्दः उपयुक्तः।[9] व्याकरणमहाभाष्ये अपि ''छन्दोवत् सूत्राणि भवन्ति " इत्यत्र वेदार्थकः छन्दशब्दः[10]।

**छन्दोविज्ञानफलम्**

सर्वे अपि मन्त्राः ऋषिः, देवता, छन्दः इत्यमूभिः निबद्धाः वर्तन्ते। अत एव मन्त्रस्य ऋषिदेवताछन्दसां ज्ञानं यस्य वर्तते स एव यजनाध्यापनादिकृतिषु सफलो लब्धश्रेयश्च भवेदिति कात्यायनाचार्यः सूचयति इत्थं-

"मन्त्राणां आर्षेयछन्दो दैवतविद्
यजनाध्यापनाभ्यां श्रेयोधिगच्छति "[11]।

स्वर्गः, यशः, आयुः, पुण्यं, अभिवृद्धिः, कीर्तिः इत्यादयो छन्दोज्ञानेन लभ्यते उव्वटः प्रातिशाख्यवृत्तौ।

"स्वर्ग्यं यशस्यमायुष्यं पुण्यं वृद्धिकरं शुभं
कीर्तिमृग्यं यशस्यं च छन्दसां ज्ञानमुच्यते ॥" इति ॥

काव्यव्युत्पत्तेः कारणेष्वन्यतमं छान्दसज्ञानमिति भामहः अभिप्रैति।[12]

" शब्दच्छन्दोभिधानार्थाः इतिहासाश्रया कथाः
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यहेतवः " इति ॥

**छन्दशास्त्रपरम्परा ॥**

छन्दसूत्रव्याख्यात्रा यादवप्रकाशेन स्वीयग्रन्थे श्लोकमित्थं प्रदत्ते –

" छन्दोज्ञानमिदं भवद्भगवतो लेभे सुराणां गुरुः
तस्माद् दुश्च्यवनस्ततोसुरगुरुमाण्डव्यनामात्मनः
माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गलः
तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात् " ॥ इति ॥

श्रीपरमेश्वरः एव आदिप्रवक्ता। परमेश्वरात् बृहस्पतिः। तेभ्यो दुश्च्यवनः अर्थात् इन्द्रः। इन्द्रात् शुक्रः। शुक्रः माण्डव्याय उपादिशत्। माण्डव्यात् सैतवः। सैतवात् यास्काचार्यः विद्यां अधीतवान्। यास्कः पिङ्गलमपाठयत्। पिङ्गलात् मत्सदृशाः अधीताः इति अस्मिन् श्लोके यादवप्रकाशः आह। **छन्दोभेदाः**

छन्दः वैदिकः लौकिकः इति द्विधा विभज्यते। मन्दक्रान्ता, वंशस्थं, शार्दूलविक्रीडितम् इत्यादीनि लौकिकानि छन्दांसि। गायत्री, उष्णिक्, पङ्क्ति, जगती इत्यादीनि वैदिकछन्दांसि। लौकिक-वैदित-लोकवेदसाधारणेति भेदत्रयं निरूप्यते छन्दसूत्रभाष्ये हलायुधेन [13]। दिव्यं, दिव्येतरं, दिव्यमानुषमिति भरतमुनेःमते छन्दोभेदाः [14]। ब्राह्मग्रन्थेषु तत्र तत्र त्रीणि एव छन्दांसि इति भणितम्। तानि च गायत्री, त्रिष्टुप्, जगती इति। पादाक्षरसंख्याम् आधारीकृत्यैव इयं गणना इति वेङ्कटमाधवस्य कथनेन स्पष्टम्। तदित्थम् –

" भवन्ति छन्दसानीह पदानि त्रीणि तद्यथा
एकमष्टाक्षरं दृष्टम् एकमेकादशाक्षरम्।
द्वादशाक्षरमप्येकं तेन त्रीणीति भाषते
पदं दशाक्षरं चाल्पं वैराजं तदुपेक्षितम् ॥ "[15]

अनेन एव अग्रे गायत्री, अनुष्टुप्, त्रिष्टुप्, जगती इति चत्वारि छन्दांसि इत्युच्यते । [16] मैत्रायणीसंहितायां तु "सप्तैव छन्दांसि " इत्युक्तम् । अनेके आचार्याश्च सप्त छन्दांसि इत्यभिप्रयन्ति । तानि च गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः. त्रिष्टुप्, जगती इति । कात्यायप्रभृतीनामाचार्याणां मते छन्दांसि चतुर्दश । अतिजगती, शक्वरी, अतिशक्वरी, अष्टी, अत्यष्टी, धृतिः, अतिधृतिः इत्यादीनि पृथक् सप्त । पतञ्चलिमहर्षेः निधानसूत्रे एतेषां नामानि भिन्नानि वर्तन्ते । पिङ्गलाचार्यः, तथा जयदेवादिछन्दशास्त्रकाराणां मते कृति, प्रकृति, आकृति, विकृति, संवृति, अभिकृति इत्यादीनामपि गणनया एकविंशतिछन्दांसि । भरत-शौनक-गार्ग्यादयः षड्विंशति छन्दांसि गणयति । मा, प्रमा, प्रतिमा, उपमा, समा, इति पञ्चानामपि छान्दसत्वम् एतेषां मते ।

**निदानसूत्रे छन्दोभेदाः**

महर्षिणा पतञ्चलिना रचितानि निदानसूत्राणि । ग्रन्थे अस्मिन् पञ्चप्रपाठकाः विद्यन्ते । प्रतिप्रपाठकं त्रयोदशखण्डाश्च भवन्ति । तत्र प्रथमखण्डे पतञ्जलिना निर्दिष्टाः छन्दोभेदाः इत्थं-

- एकपादगायत्री - 8 वर्णाः
- द्विपादगायत्री - 16 (8+8) वर्णाः
- गायत्री - 24 (8+8+8) वर्णाः
- चतुष्पादगायत्री - 24 (6+6+6+6) वर्णाः
- उष्णिक् - 28 ( 8+8+12) वर्णाः
- ककुबुष्णिक् - 28 (8+12+8) वर्णाः
- पुरउष्णिक् - 28 (12+8+8) वर्णाः
- चतुष्पादुष्णिक् - 28 (7+7+7+7) वर्णाः
- अनुष्टुप् - 32 (8+8+8+8) वर्णाः
- पिपीलिकामद्ध्यानुष्टुप् - 32 (12+8+12) वर्णाः

- पुरस्ताज्ज्योतिरनुष्टुप् - 32 (8+12+12) वर्णाः
- उपरिष्टाज्ज्योतिरनुष्टुप् - 32 (12+12+8) वर्णाः
- बृहती - 36 (9+9+9+9) वर्णाः
- पथ्याबृहती - 36 (8+8+12+8) वर्णाः
- पुरस्ताद्बृहती - 36 (13+8+8+8) वर्णाः
- उपरिष्टाद्बृहती - 36 (8+8+8+12) वर्णाः
- पङ्क्तिः - 40 (8+8+8+8+8) वर्णाः
- सिद्धापङ्क्तिः - 40 (12+8+12+8) वर्णाः
- विपरीतापङ्क्तिः - 40 (8+12+8+12) वर्णाः
- आस्तारपङ्क्तिः - 40 (8+8+12+12) वर्णाः
- प्रस्तारपङ्क्तिः - 40 (12+12+8+8) वर्णाः
- विष्टारपङ्क्तिः - 40 (8+12+12+8) वर्णाः
- अक्षरपङ्क्तिः - 20 (5+5+5+5) वर्णाः
- द्विपदाक्षरपङ्क्तिः - 20(10+10) वर्णाः
- एकपदाविराट्पङ्क्तिः - 10 वर्णाः

- पदपङ्क्तिः - 25 (5+5+5+5+5) वर्णाः
- द्विपदापङ्क्तिः - 20 (12+8) वर्णाः
- त्रिष्टुप् - 44 (11+11+11+11) वर्णाः
- ज्योतिष्मतीत्रिष्टुप् - 41 (11+11+11+8) वर्णाः
- पञ्चपदात्रिष्टुप् - 44 (8+8+8+8+12) वर्णाः
- द्विपदात्रिष्टुप् - 22 (11+11) वर्णाः
- त्रिपदात्रिष्टुप् - 33 (11+11+11) वर्णाः
- एकपदात्रिष्टुप् - 11 वर्णाः
- जगती - 48 (12+12+12+12) वर्णाः
- एकपदाजगती - 12 वर्णाः
- द्विपदाजगती - 24 (12+12) वर्णाः
- पञ्चपदाजगती - (8+8+8+12+12) वर्णाः
- विष्टारपङ्क्तिजगती - 48 (6+6+6+6+6+6) वर्णाः
- विषमपादजगती - 47 (9+14+11+13) वर्णाः
- ज्योतिष्मतीजगती - 44 (12+12+12+8) वर्णाः
- विषमपदाजगती - 35 (6+10+11+8) वर्णाः

गायत्रीछन्दः।

वैदिकच्छन्दस्सु मुख्यतमा गायत्री। गायन्तं त्रायते इति गायत्री इति गायत्रीशब्दार्थः। गायत्री छन्दसामहम् इति भगवद्वचनम् गीतायाम्। नास्ति गायत्र्यात् परो मन्त्रः इति। "गायत्रीप्रमुखं छन्दः" इति नामलिङ्गानुशासने च गायत्र्याः महत्वं स्पष्टीकृतम्।

सा गायत्री आर्षी, दैवी, आसुरी, प्राजापत्या, याजुषी, साम्नी, आर्ची, ब्राह्मी इति अष्टधा। तत्रैव आर्षीगायत्र्याः त्रिपादत्रैष्टुभविराट्, पदपङ्क्तिः, त्रिपदा, यवमध्या, उष्णिग्गर्भा, चतुष्पदा, नागी, वाराही, शंकुमती, ककुप्मती, पिपीलिकामध्या, प्रतिष्ठा, पादनिचृत्, वर्द्धमाना, विराट्द्विपदा, अतिपादनिचृत्, ह्रसीयसी इति सप्तादशभेदाः। ताः भेदाः पृथक् निरूप्यते अग्रे।

1. दैवी गायत्री इह छन्दसि प्रतिपादं सकृत् एकमेवाक्षरं वर्तते।
   उदा- ओं तत् सत् त्वम्
2. आसुरीगायत्री पञ्चादशाक्षरयुक्तं छन्दः।
   उदा- आपो ज्योतिरसोमृतं ब्रह्मभूर्भुवस्वरों
3. प्राजापत्यागायत्री अष्टाक्षराणि अस्मिन् छन्दसि वर्तते।
   उदा- भूताय त्वा नारातये (यजुर्वेदसंहिता- 1/11)
4. याजुषीगायत्री- षड्वर्णाः अस्मिन् छन्दसि।
   उदा- अश्विभ्यां पिन्यस्व (यजुर्वेदसंहिता- 38/4)
5. साम्नीगायत्री अस्मिन् छन्दसि द्वादशाक्षराणि सन्ति।
   उदा- वाचो विधृतिमग्निं प्रयुजट् स्वाहा।(यजुर्वेदसंहिता- 11/66)
6. आर्चीगायत्री अष्टादशाक्षरात्मकमिदं छन्दः।
   उदा- अग्ना इ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा (यजुर्वेदसंहिता- 8/10)
7. ब्राह्मीगायत्री षड्त्रिंशदक्षराण्यस्मिन् छन्दसि।
   उदा- इयत्यग्ने आसीन्मखस्य तेऽदुय शिरोराध्यासं
   देवयजने पृथिव्या। मखायत्वा मखस्यत्वा शीर्ष्णे (यजुर्वेदसंहिता- 36/5)
8. त्रिपाद्त्रैष्टुप् विराट् गायत्री। एकादक्षरयुक्तं पादत्रयमस्मिन् छन्दसि।
   उदा – दुही यन्मित्रधितये युवाकु
   राये चनो मिमीतं वाजवत्यै
   इषे चनो मिमीतं धेनुमत्यै ( ऋक्- 1/16/120.9)
9. पदपङ्क्तिगायत्री चतुर्विंशतिवर्णात्मकमिदं छन्दः।
   5+5+5+5+4 इति प्रकारेण वर्णाः निबद्धिताः अस्मिन् छन्दसि।

उदा - एभिर्नो अर्कैर्भवा नो अर्वाङ्
स्वर्णज्योतिः
अग्ने विश्वेभि
सुमना अनीकैः (ऋक्- 4.1.10.3)

10. त्रिपदागायत्री अष्टवर्णात्मकं पादत्रयमस्मिन् छन्दसि भवति ।
उदा – अग्निमीले पुरोहितं
यज्ञस्य देवमृत्विजम्
होतारं रत्नधातमम् (ऋक्- 1.1.1)

11. यवमध्या गायत्रि। अत्र 7+10+7=24 इत्येवं क्रमेण त्रयः पादाः सन्ति।
उदाः- सुसुन्वे यो वसूनां
यो रायामानेताय इळानां
सोमो यः सुक्षितीनाम्। (ऋक्-9/7/104/13)

12. उष्णिग्गर्भा गायत्रि। अत्र 6+7+11=24 इत्येवं त्रयः पादाः सन्ति।
उदाः-तामे अश्व्यानां
हरीणां नितोशना
उतो नु कृत्व्यानां नृवाहसा। ( ऋक्-8/25/ 23)

13. चतुष्पदा गायत्रि। अत्र 6+6+6+6=24 इत्येवं चत्वारः पादाः सन्ति।
उदाः- इन्द्रः शचीपतिर्-
बलेन वीलितः
दुश्च्यवनो वृषा
लमत्सु सामहि ।

14. नागी गायत्रि। अत्र 9+9+6=24 इत्यवं त्रयः पादाः सन्ति।
उदाः- अग्ने तमद्याश्वं न स्तोमैः
क्रतुं न भद्रं हृदि स्पृशं
ऋध्यामा त ओहैः। ( ऋक्-4/1/10/1 )

15. वाराही गायत्रि। अत्र 6+9+9=24 इत्येवं त्रयः पादाः सन्ति।
उदाः- अग्ने मृळ महाम्
असि यऽईमा देवयुं जनम्
इयेथ बर्हिरासदम्। ( ऋक् -4/1/9/1 )

16.आर्षगायत्रि। अत्र त्रयः पादाः, प्रतिपादे अष्टौ अक्षराणि,
एवं आहत्य 24 अक्षराणि च सन्ति।
उदाः- तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात्। (यजु -3/2 )

17 .शङ्कुमती गायत्रि। अत्र 5+8+8= 21 इत्येवं क्रमेण त्रयः पादाः सन्ति।
क्वचित् 5+6+66=23 इत्येवमपि दृश्यते।
उदाः- युक्तेन मनसा वयं
देवस्य सवितुः सवे
स्वर्ग्याय शक्त्या। (यजुर्वेदसंहिता 11/2)

18.ककुम्मति गायत्रि। अत्र 6+8+8=242 इत्येवं त्रयः एव पादाः सन्ति।
उदाः- त्वं ह्यग्ने अग्निना
विप्रो विप्रेण सन्त्सता
सखा सख्या समिध्यसे। ( ऋक्- 6/3/31/4 )

19.पिपीलिका मध्या(अणिष्ठगर्भा)। अत्र 8+4+8=20 , 8+5+8=21, 8+6+8=22 इति क्रमः दृश्यते।
उदाः- नृभिर्येमानो हर्यतो
विचक्षणो
राजादेवः समुद्रियः (ऋक्- 7/5/15/16)

20.प्रतिष्ठा गायत्रि। अत्र 8+7+6=21 इत्येवं क्रमेण त्रयः पादाः सन्ति।
उदा:- आप पृणीत भेषजं
वरूथं तन्वे मम
ज्योक्च सूर्यं दृशे। (ऋक्- 10/1/9/7)

21.पादनिचृत् गायत्री। अत्र 7+7+7=21 इत्येवं त्रयः पादाः सन्ति।
उदाः- युवाकु हि शचीनां
युवाकु सुमतीनां
भूयाम वाजदाव्नां। ( ऋक्- 1/4/17/4 )

22.वर्धमाना गायत्रि। अत्र 6+7+8=21 इति क्रमशः त्रयः पादाः सन्ति।
उदाः- ईशाना वार्याणां
क्षयन्तीश्चर्षणीनाम्
अपो याचामि भेषजम् । ( ऋक्-10/1/9/5 )

| | |
|---|---|
| 23.विराट् द्विपदा गायत्रि। | अत्र 12+8=20 इत्येवं क्रमेण द्वौ एव पादौ वर्तेते। |
| | उदाः- पश्वा न तायुं गुहा चतन्तं नमो युञ्जानं नमो वहन्तम्। |
| | सजोषा धीराः पदैरनुग्मन्नुप त्वा सीदन्विश्वे यजत्राः। ( ऋक्-1/12/65/1) |
| 24.अतिपादनिचृत् गायत्रि। | अत्र 7+6+8=21 इत्येवं त्रयः पादाः सन्ति। |
| | उदाः-पुरूतमं पुरूणां |
| | स्तोतॄणां विवाचि |
| | वाजेभिर् वाजयतां। (ऋक्- 6/4/46/29) |
| 25.ह्रसीयसी गायत्रि। | अत्र 6+6+7=19 इत्येवं त्रयः एव पादाः सन्ति। |
| | उदाः- प्रेष्ठमुप्रियाणां |
| | स्तुह्यासावातिथिम् |
| | अग्निं रथानां यमम्। ( ऋक्- 8/10/93/10) |

न केवलं गायत्र्याः इतरेषामपि छन्दसाम् अनेकाः प्रभेदाः दृश्यन्ते। प्रबन्धविस्तारभयात् सर्वाः अपि नैव विशदीक्रियते। पिपठिषूणां उपकाराय संक्षेपरूपेण सप्तछन्दसां ईषद्भेदाः कोष्ठकरूपेण लेखस्यान्ते प्रदीयते।

छन्दशास्त्रम् तु इतः अपि विस्तृतम् भवति। एकस्य वर्णस्य न्यूनतया आधिक्येन वा छन्दः नैव परिवर्तते किन्तु तत्तु निचृत्, विराट्,भूरिक्, स्वराट् इति भेदः एव जायते इति च व्यवहार इति शिष्टवचनम्। यदि एकमक्षरं न्यूनं चेत् निचृत् यद्यधिकं चेत् भूरिक् इति। अक्षरद्वयम् न्यूनं चेत् विराट्, अधिकं चेत् स्वराट् इति च। प्रत्येकस्य छन्दसः देवता, स्वरः, गोत्रमित्यादीनि वर्तन्ते कोष्ठकात् स्पष्टम्। सप्त एव वर्णरश्मयः दिवाकरस्य, प्रपञ्चस्य नादलयः सप्तस्वरविन्यासः, इह तु प्रमुखानि सप्तछन्दांसि अपि एभिः संबद्धीकृतानि दृश्यन्ते। एवं कुतः छन्दसां प्रत्येकं स्वरः निर्दिष्टः ? छन्दसां वर्णानां च मिथः कः संबद्धः ? इत्यादयः बहवो प्रश्नाः अध्येतॄणां मनसि उदेति इति निश्चयम्। प्रपञ्चस्य लयविन्यासः छन्दांसि। प्रपञ्चस्य स्पन्दनमपि छन्दांसि अनुसृत्य एव। वृष्टिपातः, निर्झराः, पवनः, सौदामिनी, अग्नेर्ज्वलनं इत्यादीनां प्रत्येकस्यापि पृथक् रागः, तदनु स्वरभेदः, छन्दः च वर्तन्ते। समग्रेण छन्दशास्त्राध्ययनेन प्रपञ्चस्य समग्रावगमवं भवितेति नूनम्। छन्दशास्त्राध्ययने प्रविविक्षूणां बालानां कृते अयं प्रबन्धः उत्प्रेरको भवेदिति प्रार्थये।

# वैदिकछन्दोकोष्ठकम्

| देवता | अग्निः | सविता | सोमः | बृहस्पतिः | वरुणः | इन्द्रः | विश्वेदेवाः |
|---|---|---|---|---|---|---|---|
| स्वरः | षड्जं | ऋषभं | गांधारं | मध्यमं | पंचमं | धैवतं | निषादं |
| वर्ण | सितः | सारंगः | पिशंगः | कृष्णः | नीलः | लोहितः | गौरः |
| गोत्रम् | आग्नि-वैश्यः | काश्यपः | गौतमः | आंगिरसः | भार्गवः | कौशिकः | वासिष्ठः |
| छन्दः | गायत्री | उष्णिक् | अनुष्टुप् | बृहती | पंक्तिः | त्रिष्टुप् | जगती |
| आर्षी | 24 | 28 | 32 | 36 | 40 | 44 | 48 |
| दैवी | 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| आसुरी | 15 | 14 | 13 | 12 | 11 | 10 | 9 |
| प्राजापत्या | 8 | 12 | 16 | 20 | 24 | 28 | 32 |
| याजुषी | 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| साम्नी | 12 | 14 | 16 | 18 | 20 | 22 | 24 |
| आर्ची | 18 | 21 | 24 | 27 | 30 | 33 | 36 |
| ब्राह्मी | 36 | 42 | 48 | 54 | 60 | 66 | 72 |

## टिप्पणी

1. पातञ्जलमहाभाष्यम्- पश्पशाह्निकम्।
2. ज्योतिकल्पो निरुक्तञ्च शिक्षा व्याकरणं तथा
   छन्दो विचिकिरेतानि षडङ्गानि विदुः श्रुतेः (प्रश्नमार्गः -10 )
3. पाणिनीयशिक्षा - 42
4. ऋग्वेदसर्वानुक्रमणिका -
5. अथर्वबृहत्संहिता
6. अमरकोशः 3.3.233
7. निरुक्तं 7.12
8. तैत्तिरीयासंहिता 6-6-1
9. भगवद्गीता-15-1
10. व्याकरणमहाभाष्यम् - वृद्धिरादैच्
11. ऋक्सर्वानुक्रमणिकापरिशिष्टं 1-4
12. काव्यालङ्कारः 1.9
13. छन्दसूत्रभाष्यं – 4.7
14. नाट्यशास्त्रं- 14-16
15. छन्दोनुक्रमणिका – 6-1-5,6
16. छन्दोनुक्रमणिका – 6-1-7